JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

# काव्यमीमांसायां प्रतिपादिताः कवयः - तेषां भेदाः अवस्थाश्च

**डॉ.सि हेच्. पवन् कुमारः**, संस्कृते अतिथि अध्यापकः, तेलुगु & प्राच्यभाषाविभागः,
आचार्य नागार्जुनविश्वविद्यालयः, नागार्जुननगरः, गुण्टूरु, आन्ध्रप्रदेशः,

## शोधपत्रसारः

**(Abstract)**

---

अलंकरोतीति अलङ्कारः, अलंक्रियतेऽनेनेति वा अलंकारः, सौन्दर्यमलङ्कारः । स च गुणादानदोषहानात्सम्पद्यते । तेनैतत्पर्यवस्यति यद्वाचां सौन्दर्याधायकतत्त्वग्रहणं तन्निरोधकतत्त्वोपासनमेवालङ्कारस्तस्य शास्त्रं विवेचकविद्येति अलङ्कारशास्त्रम् । इदमेव साहित्यशास्त्रं - सौन्दर्यशास्त्रम्, काव्यलक्षणसाहित्यं काव्यशास्त्रमपि व्यपदिश्यते । काव्यसाहित्यस्य स्वरूपावधारकत्वादिदं काव्यलक्षणसाहित्यं वा काव्यशास्त्रं, साहित्यविशेषस्य स्वरूपनिर्द्धारकत्वादिदं साहित्यशास्त्रमपि । तथैव काव्यगतसौन्दर्याधायितत्त्वव्याख्यातृत्वात्सौन्दर्य -शास्त्रमपि चैतत्कथ्यते । अभिधानन्तु स्याद्यथा वा तथा, शास्त्रमिदं काव्यस्वरूपावधारकम् । तत्रापि काव्यसौन्दर्यनिमित्तं किं किमावश्यकं किञ्चानावश्यकं किं काव्यसौन्दर्योत्कर्षाधायकं किंच तद्घातकमित्यादिरस्य विषयसमूहस्तेनेदं वस्तुतोऽलङ्कारशास्त्रं वा काव्यशास्त्रम् ।

अलङ्कारशास्त्रमिदं कदाप्रभृति प्रवर्तितमिति तु न शक्यते इदमित्थम् ।

एतादृशं समुन्नतं, प्राचीनं काव्यालङ्कारेशास्त्रे अनेके कवयः - आलङ्कारिकाः तैः सुकृतिभिः सुरभारतीं संसेव्यन्ते । एतेषु अन्यतमः, अग्रगण्यः राजशेखरः महाकविः । अनेन महाभागेन विरचित काव्यमीमांसायां प्रतिपादिताः कवयः - तेषां भेदाः अवस्थाश्च अस्मिन् शोधपत्रे मया यथामति परिशीलितमस्ति ।

## कूटशब्दाः (Key-words)

(1) काव्यमीमांसायां प्रतिपादिताः कवयः - तेषां भेदाः,

(2) कवेरवस्थाः ।

## आमुखम्

कविशिक्षा-सम्प्रदाय-संचालने महाकवेः राजशेखरस्य सर्वातिशायी वैशिष्ट्यं वर्तते । ध्वनि-रस-अलंकार-रीति-वक्रोक्तिभिन्नं कविशिक्षणनिरतं कार्यमिदं काव्यमीमांसा सर्वथा प्रशंसनीयमेव विशिष्टकार्यसाधकत्वात्। अत्र कस्यापि मतस्य न वा समर्थनं न वा विरोधः। केवलं कविशिक्षणमेवास्य लक्ष्यम् । राजशेखरप्रवर्तितोऽयं कविशिक्षासम्प्रदायः क्षेमेन्द्र-अरिसिंह-अमरचन्द्र-देवेश्वरादिभिः पृथुलतां नीतः ।

एतादृशः महोन्नत कविवरः राजशेखरेण विरचित काव्यमीमांसाख्यः विशालकायग्रन्थोऽयं अष्टादशधिकरणेषु विभक्तमासीत्, किन्तु सम्प्रति प्रथमाधिकरणमेव उपलभ्यते, यत्र अष्टादशसंख्यकाः अध्यायाः सन्ति । तेषु पञ्चमोऽध्याये राजशेखरेण कवित्वलाभाय प्रतिभा-व्युत्पत्ति-विवेचनक्रमे बहूनां मतानि समुद्धृत्य उभयोः आवश्यकता प्रतिपादिता । अनन्तरं तत्रैव कविभेदाः - अवस्थाश्च सुष्ठु निरूपिताः । राजशेखरेण प्रतिपादितान् कविभेदान्-अवस्थाश्च यथामति परिशीलनमेव मदीय शोधपत्रस्य प्रधानोद्देश्यः ।

## (1) काव्यमीमांसायां प्रतिपादिताः कवयः - तेषां भेदाः

**"कविर्मनीषी परिभूः स्वयम्भूः"** (1)

**"अपारे काव्यसंसारे कविरेव प्रजापतिः"** (2)

**"काव्यं तु जायते जातु कस्यचित्प्रतिभावतः"** (3)

**"लोकोत्तरवर्णनानिपुणः कविः"** (4)

इत्येवंप्रकारेण अनेकैः काव्यालङ्कारशास्त्रनिपुणैः 'कवि'शब्दः निर्वचितोऽस्ति। एवमेव कवि परिभाषायन्नाह राजशेखरः -

**"प्रतिभाव्युत्पत्तिमांश्च कविः कविरित्युच्यते"।** (5)

वस्तुतः प्रतिभावान् व्युत्पत्तिवांश्च कविशब्दभाक् भवति । स च त्रिधा - (1) शास्त्रकविः, (2) काव्यकविः, (3) उभयकविश्च ।

**"तेषामुत्तरोत्तरीयो गरीयान्"** (6)

1. द्रः ईशावास्योपनिषत् - मन्त्रः - 8, पृः7
2. द्रः आनन्दवर्धनाचार्यः - ध्वन्यालोकः - III - पृः551
3. द्रः भामहः - काव्यालङ्कारः - I/5 - पृः12
4. द्रः मम्मटाचार्यः - काव्यप्रकाश - I - पृः46
5. द्रः राजशेखरः - काव्यमीमांसा - V - पृः73
6. द्रः राजशेखरः - काव्यमीमांसा - V - पृः73

इति श्यामदेवः । अर्थात् शास्त्रकवेः उत्कृष्टः काव्यकविः, ततः उत्कृष्टतरः उभयकविः इति । श्यामदेवमतात् स्वकीयं भिन्नं मतं प्रदर्शयति यायावरीयो राजशेखरकविः । श्यामदेवमतं न समीचीनं यतो हि सर्वे स्व-स्वविषये गरीयांसः सन्ति। यथा राजहंसो हि चन्द्रिकां पातुं न प्रभवति किन्तूदकात् दुग्धोद्धरणे एव स प्रवीणः, चकोरोऽपि जलात् दुग्धं पृथक् कर्तुं न प्रभवति, किन्तु कौमुदीपानाय स समर्थः । तथा च स्वाभ्यस्ते एव विषये सर्वो जनः प्रकर्षवान् भवतीति निरवद्यम् ।

त्रिविधकविभेदं दर्शयति - यतः शास्त्रकविः स्वनिर्मिते काव्ये रसभिव्यञ्जनसमर्थशब्दार्थगुम्फनं विच्छेदं करोति । यतः काव्यकविः शास्त्रीयपदार्थप्रणयने कठिनमप्यर्थं कोमलवर्णविन्यासेन, कथनवैलक्षण्येन वा शिथिलीकरोति । उभयमत्र यदि काव्ये, शास्त्रे च परं प्रवीणः स्यात् तदा द्वयोः श्रेष्ठतमः । तस्मात् कारणात् शास्त्रकविः काव्यकविश्चेत्युभौ समानौ स्तः इति । किन्तु उपजीव्योपजीवकत्वम्, परस्परं तयोः शास्त्रकाव्यकव्योः अनुमोदामहे । यतः शास्त्रस्य साधारणः प्रवेशः काव्यरचनायां वैचित्र्यमुत्पादयति काव्यं चारुकरोति, केवलशास्त्रानुसारित्वं तु काव्यचारुत्वस्य निग्रहं करोति ।

काव्यसंस्कारोऽपि शास्त्रीयवाक्यस्य परिणतिसौष्ठवम् अनुवर्तते, काव्यमात्रज्ञानाधीनत्वम् विपरिवर्तते । उक्तभेदभिन्नान् त्रिधा कवीन् विभजते - तेषु शास्त्रकविः त्रिधा भवति - (1) यः शास्त्रीयान् ग्रन्थान् विरचयति अयमेकः प्रकारः, (2) यश्च शास्त्रीयान् पदार्थान् काव्यरूपेण परिणयति अयं द्वितीयः प्रकारः, (3) योऽपि काव्यपदार्थान् शास्त्रीयपरिभाषया निबध्नाति अयं तृतीयः प्रकारः ।

काव्यकविः पुनरष्टधा - तद्यथा - (1) रचनाकविः, (2) शब्दकविः, (3) अर्थकविः, (4) अलङ्कारकविः, (5) उक्तिकविः, (6) रसकविः, (7) मार्गकविः, (8) शास्त्रार्थकविरिति । तद्यथा-

**(1.1)** **रचनाकविः** स्व रचनासु यः कविः शब्दसौन्दर्यस्य प्राधान्यं दत्त्वा, अर्थस्य प्राधान्यं नैव गण्यते स कविः रचनाकविः । यथा -

**"लोलल्लाङ्गूलवल्लीवलयितबकुलानोकहस्कन्धगोलै-**
**र्गोलाङ्गूलैर्नदद्भिः प्रतिरसितजरत्कन्दरामन्दिरेषु ।**
**खण्डेषूद्दण्डपिण्डीतगरतरलकाः प्रापिरे येन वेला -**
**मालङ्घयोत्तालतल्लस्फुटितपुटकिनीबन्धवो गन्धवाहाः ।।"** [1] इति ।

श्लोकेऽस्मिन् शब्दसौन्दर्यः अत्युत्तयाऽस्ति, किन्तु अनावश्यकाः निरर्थकाः शब्दाश्च अनेके अत्र दृश्यन्ते।

**(1.2)** **शब्दकविः** नामाख्यातोभयभेदेन शब्दकविः त्रिप्रकारः । तेषु -

**(अ)** **नामकविः** - "केवलं संज्ञाशब्दं कवते यः सः नामकविः । यथा-

**"विद्येव पुंसो महिमेव राज्ञः प्रज्ञेव वैद्यस्य दयेव साधोः ।**

**लज्जेव शूरस्य मृजेव यूनो विभूषणं तस्य नृपस्य सैव।।"** [2] इति ।

अत्र कविना विद्याप्रभृतीनां संज्ञाशब्दानामेव संघटना कृता नान्येषाम् ।

1. द्रः राजशेखरः - काव्यमीमांसा - v - पृः75
2. द्रः राजशेखरः - काव्यमीमांसा - v - पृः76

(आ) **आख्यातकविः** "आख्यातं तिङ्गन्तं कवते रचयति योऽसौ आख्यातकविः" । यथा-

**"उच्चैस्तरां जहसुराजहृषुजैगर्जुराजघ्निरे भुजतटीनिकरैः स्फुरद्भिः।**

**सन्तुष्टुवुर्मुमुदिरे बहु मेनिरे च वाचं गुरोरमृतसम्भवलाभगर्भाम् ।।"**(1) इति ।

पद्येऽस्मिन् जहसुरित्यादीनामाख्यातानामेव प्रयोगबाहुल्यं विद्यते ।

**(इ) नामाख्यातकविः** "नामाख्याते उभे कवते रचयति वर्णयति यः स नामाख्यातोभयकविः"। यथा -

**"हतत्विषोऽन्धा शिथिलांसबाहवः स्त्रियो विषादेन विचेतना इव ।**

**न चुक्रुशुर्नो रुरुदुर्न सस्वनुर्न चेलुरासुर्लिखिता इव क्षणम् ।"**(2) इति ।

अत्र पूर्वार्द्धे नाम्नामुत्तरार्द्धे च आख्यातानां रचना वर्तते ।

(1.3) **अर्थकविः** "अर्थमात्रमलङ्कारादिहीनं कवते वर्णयति योऽसावर्थकविः" । यथा -

**"देवी पुत्रमसूत नृत्यत गणाः किं तिष्ठतेत्युद्भुजे**
**हर्षाद् भृङ्गिरिटावुदाहृतगिरा चामुण्डयाऽऽलिङ्गिते ।**
**पायाद्वो जितदेवदुन्दुभिर्घनध्वानप्रवृत्तिस्तयो -**

**रन्योन्याङ्कनिपातजर्जरजरत्स्थूलास्थिजन्मा रवः ।।"**(3) इति ।

पार्वतीदेव्याः प्रथमसन्ततिजन्मश्रवणात् आनन्दनिमग्नानां तद्गणानां कायिको वाचिको मानसिकश्च भावोऽत्र वर्णितः। अत्र नाम-आख्यातयोः प्राधान्यं नैव दत्त्वा कविः केवलं चमत्कारर्थस्य प्राधान्यं दीयते।

(1.4) **अलङ्कारकविः** शब्दालङ्कारार्थालङ्कारभेदेन अलङ्कारकविः द्विप्रकारकः । तयोर्मध्ये प्रथमोपस्थितत्वात् प्रथमं शब्दालङ्कारमुदाहरति । यथा -

**"न प्राप्तं विषमरणं प्राप्तं पापेन कर्मणा विषमरणं च ।**

**न मृतो भागीरथ्यां मृतोऽहमुपगुह्य मन्दभागी रथ्याम् ।"** (4) इति ।

अत्र प्रथम - द्वितीययोः तृतीयचतुर्थयोश्च चरणयोर्मध्ये यमकालङ्कारः । स च शब्दालङ्कारे गणितोऽस्ति कस्यापि निर्विण्णस्य पुंस उक्तिरियम् । द्वितीयं अर्थाऽलङ्कारमुदाहरति । यथा -

**"भ्रान्तिजिह्वापताकस्य फणच्छत्रस्य वासुकेः ।**

**दंष्ट्राशलाकादारिद्र्यं कर्त्तुं योग्योऽस्ति मे भुजः ।।"** (5) इति ।

श्लोकेऽस्मिन् जिह्वायां पताकायाः, फणे छवस्य, दंष्ट्रायां शलाकायाश्चारोपाद्रूपकालङ्कारः । एष हि अर्थालङ्कारमध्यवर्ती अलङ्कारः ।

1. द्रः राजशेखरः - काव्यमीमांसा - *v* - पृः76
2. द्रः राजशेखरः - काव्यमीमांसा - *v* - पृः77
3. द्रः राजशेखरः - काव्यमीमांसा - *v* - पृः77-78
4. द्रः राजशेखरः - काव्यमीमांसा - *v* - पृः78
5. द्रः राजशेखरः - काव्यमीमांसा - *v* - पृः79

(1.5) **उक्तिकविः** "उक्तिं वक्रोक्तिमेव कवते वर्णयति यः स उक्तिकविरुदाह्रियते ।" यथा -

**"उदरमिदमनिन्द्यं मानिनीश्वासलाव्यं स्तनतटपरिणाहो दोर्लतालेह्यसीमा ।**

**स्फुरति च वदनेन्दुर्दृक्प्रणालीनिपेयस्तदिह सुदृशि कल्याः केलयो यौवनस्य ।।"**(1) इति ।

अत्रोक्तावेव वैचित्र्योगितयाभिधान एव कवेस्तात्पर्यम् ।

यथा वा-

**"प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः**
**कपोलः पाण्डुत्वादवतरति ताडीपरिणतिम् ।**
**परिम्लानप्रायामनुवदति दृष्टिः कमलिनी**

**मतीयं माधुर्यं स्पृशति च तनुत्वं च भजते ।।"** (2) इति ।

अत्र प्रतीच्छति, अवतरति, स्पृशतीत्यादि चेतनक्रियाधर्माणाम् अचेतनेषु अधरादिषु अध्यारोपः उपचारवक्तृत्वं प्रत्यायति।

(1.6) **रसकविः** "रसमेव कवते वर्णयति योऽसौ रसकविः उदाह्रियते ।" यथा-

**"एतां विलोक्य तनूदरि ताम्रपर्णीमम्भोनिधौ विवृतशुक्तिपुटोद्धृतानि ।**

**यस्याः पयांसि परिणाहिषु हारमूर्त्या वामभ्रुवां परिणमन्ति पयोधरेषु ।।"**(3) इति ।

जले विहरन् कोऽपि नायकः काञ्चिन्नायिकां वदति । हे तनूदरि ! अवलोकय ताम्रपर्णीजलान्येव शुक्तिषु स्थितानि सागरे मौक्तिकात्मना परिणमन्तीति । अत्र शृंगाररसस्फूर्तिरेव विद्यते ।

(1.7) **मार्गकविः** "मार्ग्यन्ते अन्वेष्यन्ते गुणा अस्मिन्निति मार्गो रीतिः, तमेव कवते वर्णयति यः सः मार्गकविरुदाह्रियते।" यथा -

**"मूलं बालकवीरुधां सुरभयो जातीतरूणां त्वचः**
**सारश्चन्दनशाखिनां किसलयान्यार्द्राण्यशोकस्य च ।**
**शैरींषी कुसुमोद्गतिः परिणमन् मोचं च सोऽयं गणो**

**ग्रीष्मेणोष्महारः पुरा किल ददे दग्धाय पञ्चेषवे।।"** (4) इति ।

उष्महरा एते पूर्वोक्ताः पदार्था ग्रीष्मे एव भवन्तीति भावः । अत्र कोमलवर्णसमासरचनया वैदर्भीरीतिघटितमिदं पद्यम् । कविः श्लोकेऽस्मिन् ग्रीष्मतापहरा सामाग्रीं एकस्मिन् क्रमे निक्षिप्य वर्णितकारणेन अयं मार्गकविरेव ।

---

1. द्रः राजशेखरः - काव्यमीमांसा - v - पृ:79
2. द्रः राजशेखरः - काव्यमीमांसा - v - पृ:80
3. द्रः राजशेखरः - काव्यमीमांसा - v - पृ:80-81
4. द्रः राजशेखरः - काव्यमीमांसा - v - पृ:81

**(1.8) शास्त्रार्थकविः** "शास्त्रीयं पदार्थं कवते वर्णयति यः सः शास्त्रार्थकविः उदाह्रियते।" यथा-

**"आत्मारामा विहितरतयो निर्विकल्पे समाधौ**
**ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।**
**यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्**
**तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ।।"** (1) इति ।

पूतान्तः करणैः मुनिभिर्ज्ञेयो ब्रह्मरूपो भगवान् श्रीकृष्णः दुष्टेन दुर्योधनेन कथं ज्ञातुं शक्यः ? अत्र आत्मारामनिर्विकल्पादिशब्दा योगशास्त्रगम्या एव निबद्धाः ।

पूर्वकथितानामेकादशकवीनां मध्ये द्वाभ्यां त्रिभिर्वा शब्दार्थालङ्काररचनात्मकैः गुणैः अधमकोटिगणितः, पञ्चभिः षड्भिर्वा गुणैः मध्यमकोटिकः, पूर्वोक्तैर्निखिलैर्गुणैर्युक्तः, महान्तमर्थराशिं च कवते वर्णयति यः सः महाकविव्यपदेशार्हः ।

## (2) कवेरवस्थाः

कवेः काव्यनिबद्धा दश अवस्था भवन्ति । दशावस्थानां मध्ये बुद्धिमांश्च आहार्यश्चेति। जन्मान्तरसंस्कारप्रवृत्त सारस्वतीको बुद्धिमान् सारस्वतः प्रोक्तः, इह जन्मनोऽभ्यासेन उद्भासिता भारती यस्यासौ द्वितीयः आहार्यबुद्धिः आभ्यासिकः। तयोः सारस्वताभ्यासिकयोः सप्तावस्था भवन्ति । उपदेशितैः मन्त्रतन्त्रादिभिः दर्शितः वाचां विभवो येन सः तृतीयः दुर्बद्धिः औपदेशिकः । दुर्बुद्धेः त्रिस्रोऽवस्थाः सन्ति । तद्यया - (1) काव्यविद्यास्नातकः, (2) हृदयकविः, (3) अन्यापदेशी, (4) सेविता, (5) घटमानः, (6) महाकविः, (7) कविराजः, (8) आवेशिकः, (9)अविच्छेदी, (10) संक्रामयिता च ।

**(2.1) काव्यविद्यास्नातकः** यः कवित्वं कामयमानः काव्यस्योपयोगिनी विद्या आन्वीक्षिक्यादिशास्त्रम्, उपविद्याः चतुःषष्टिकलाः ग्रहीतुं आचार्याश्रमान् सेवते स प्रथमः काव्यविद्यास्नातकः कविः ।

**(2.2) हृदयकविः** यः स्वहृदये एव, लज्जाया, दोषप्रकाशनभयेन विनयादिना वा कवते पदार्थं वर्णयति, गोपयति च सः हृदयकविः ।

**(2.3)** **अन्यापदेशीः** यः स्वरचितमपि कवित्वं दोषप्रदर्शनशङ्कया अन्यस्य कस्यचित् रचितम् उक्त्वा, जनानां समक्षं श्रावयति सोऽन्यापदेशी कविः ।

**(2.4)** **सेविता** यः किञ्चित् किञ्चत् प्रचलितकविताप्रवृत्तिः पौरस्त्यानां पूर्वं जातानां गौडदेशोद्भवानां मध्ये अन्यतमस्य कस्यचिदेकस्य सरणिम्, भावं वा गृहीत्वा काव्यं कर्तुं पुनः पुनः प्रवर्ततेऽसौ सेविताकविरुच्यते ।

**(2.5)** **घटमानः** यः निर्दोषं विशुद्धं रसभावादिभरितं कवते, न ग्रन्थघटकी करोति, स घटमानः कविः निगद्यते ।

**(2.6)** **महाकविः** यः गद्यपद्यान्तरप्रबन्धग्रन्थरचनायां निपुणः कुशलो दक्षो वा स महाकविरित्युच्यते।

1. द्रः राजशेखरः - काव्यमीमांसा - V - पृः82

**(2.7)** **कविराजः** यस्तु संस्कृतप्रकृतापभ्रंशादि भाषासु, गद्यपद्यचम्पूप्रभृतिग्रन्थेषु तस्मिंस्तस्मिंश्च शृंगारादौ रसे प्रबन्धनिर्माणे स्वातन्त्र्येण रसयोजने समर्थः स कविराज इत्युच्यते । एतादृशाः कविराजास्तु जगति विरला एव भवन्ति ।

**(2.8)** **आवेशिकः** यः मन्त्रप्रभावदेवर्षिवरदानसारस्वतचूर्णसेवनादिना प्राप्तसिद्धिः यदावेशस्तस्मिन् काले काव्यं करोति स आवेशिकः कविः ।

**(2.9)** **अविच्छेदी** यः यस्मिन् काले वाञ्छति तस्मिन्नेव काले प्रावाहिकं कवते असौ अविच्छेदी कविः ।

**(2.10)** **संक्रामयति** यो कन्याकुमारी - कामाख्या - विन्ध्याचलादिषु सिद्धपीठेषु कृतजपः वाग्देवीं स्वस्मिन् स्थापयति स संक्रामयिता कविः ।

**उपसंहारः** इत्येवंप्रकारेण कविराज बिरुदाङ्कितेन राजशेखरमहाकविना प्रणीता काव्यमीमांसाग्रन्थे पञ्चमाध्याये कवयः - तेषां भेदाः अवस्थाश्च सुष्ठु निरूपिताः ।

## उपयुक्तग्रन्थसूची


(1) श्रीशङ्करग्रन्थावली प्रथमोभागः ईशादिदशोपनिषदः श्रीशङ्करभाष्ययुताः श्रीगोविन्दशास्त्रिणा टिप्पणिभः समलङ्कृताः - मोतीलाल बनारसीदास - दिल्ली

(2) आनन्दवर्धनाचार्यविरचितःध्वन्यालोकः 'दीधिति' - संस्कृत-हिन्दी व्याख्योपेतः बन्द्रीनाथशर्मा & शोभित् मिश्रा - चौखम्बा संस्कृत सीरीज आफीस - वाराणसी

| | | | | |
|---|---|---|---|---|
| (3) | भामहविरचितः काव्यालङ्कारः<br>बालानन्दिन्याख्यया<br>आन्ध्रभाषाव्याख्यया समेतः<br>डॉ. पुल्लेल श्रीरामचन्द्रः | - संस्कृतभाषा प्रचारसमिति | - | हैदराबादु |
| (4) | मम्मटविरचित काव्यप्रकाशमु<br>बालानन्दिन्याख्यया<br>डॉ. पुल्लेल श्रीरामचन्द्रः | - संस्कृत भाषा प्रचारसमिति | - | हैदराबादु |
| (5) | कविराजश्रीराजशेखरप्रणीता<br>काव्यमीमांसा<br>'विमला' - 'सुधा' - संस्कृत - हिन्दीव्याख्याद्वयोपेता<br>व्याख्याकारः<br>डॉ. श्रीकृष्णमणि त्रिपाठी | - चौखम्बा सुरभारतीप्रकाशन | - | वाराणसी |